**COHERENCE** – The Multidisciplinary Research Journal
Volume No: 16, Issue No: 1, Year: 2025 (January-June)
PP: 93-98

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

# व्याकरणेषु पाणिनीय-व्याकरणस्यैव वेदाङ्गत्त्वम्

**डॉ. बद्री नारायण चौधरी**
ग्राम+पो.- सहसराम, थाना बिरौल, जिला- दरभंगा

## सारांश

भारतीयज्ञानपरम्परायां वेदानां संरक्षणाय, अध्ययनाय तथा यथार्थार्थबोधाय षड्वेदाङ्गानि निर्दिष्टानि सन्ति - शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः तथा ज्योतिषम् । एतेषु व्याकरणं वेदपुरुषस्य मुखरूपेण परिगणितम् अस्ति । व्याकरणशास्त्रस्य प्रमुखः उद्देश्यः शब्दानां शुद्धरूपनिर्णयः, भाषिकशुद्धतायाः संरक्षणम् तथा वेदमन्त्राणां यथार्थबोधस्य सुनिश्चितीकरणम् इति अस्ति। भारतीयव्याकरणपरम्परायां अनेकानि व्याकरणानि प्रचलितानि सन्ति, यथा ऐन्द्रव्याकरणम्, कातन्त्रव्याकरणम्, चान्द्रव्याकरणम्, जैनव्याकरणम्, शाकटायनव्याकरणम्, हेमचन्द्रव्याकरणम् इत्यादीनि । तथापि एतेषां मध्ये पाणिनीयव्याकरणमेव सर्वाधिकं प्रामाणिकं, सर्वस्वीकृतं तथा वेदाङ्गरूपेण प्रतिष्ठितं मन्यते। महर्षिपाणिनिना प्रणीतम् 'अष्टाध्यायी' इति व्याकरणग्रन्थः संस्कृतव्याकरणस्य सर्वोच्चप्रतिनिधिग्रन्थः अस्ति। अस्य ग्रन्थस्य विशेषता तस्य वैज्ञानिकता, सूत्रलाघवम्, सर्वाङ्गपूर्णता तथा भाषावैज्ञानिकदृष्ट्या तस्य अद्वितीयता च अस्ति। पाणिनीयव्याकरणं केवलं लौकिकसंस्कृतभाषायाः नियमाः न प्रतिपादयति, अपितु वैदिकभाषायाः अपि विशिष्टप्रयोगान् सम्यग्रूपेण निरूपयति । अष्टाध्याय्यां वैदिकस्वराः, वैदिकरूपाणि, छान्दसप्रयोगाश्च विशेषरूपेण विवेचिताः सन्ति । अतः वेदाध्ययनस्य सन्दर्भे पाणिनीयव्याकरणस्य उपयोगिता विशेषतया प्रतिपाद्यते । पतञ्जलिमहाभाष्ये, कात्यायनवार्तिकेषु तथा परवर्तिषु वैयाकरणग्रन्थेषु पाणिनीयपरम्परायाः सर्वोच्चप्रामाण्यं प्रतिपादितम् अस्ति। वेदाङ्गत्वस्य मूलाधारः वेदरक्षणं वेदार्थप्रकाशनं च भवति, एतयोः उभयोः कार्ययोः पाणिनीयव्याकरणं सर्वाधिकं समर्थं दृश्यते। अन्यानि व्याकरणानि प्रायः शिक्षोपयोगिनि, संक्षिप्तरूपाणि वा सन्ति, किन्तु वेदप्रयोगानां सम्यक् निरूपणं तेषु न दृश्यते। अतः स्पष्टं भवति यत् व्याकरणशास्त्रेषु पाणिनीयव्याकरणमेव वेदाङ्गरूपेण स्वीकृतम् अस्ति, यतः तदेव वेदभाषायाः संरक्षणे, वेदार्थस्य प्रकाशने तथा संस्कृतभाषायाः शुद्धस्वरूपस्य निरूपणे पूर्णतया समर्थं विद्यते।

## भूमिका

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥**[1]

शब्दसाधुत्वज्ञानाय प्रवृत्तेषु व्याकरणशास्त्रेषु पाणिनीय व्याकरणशास्त्रं सर्वाधिक महत्त्वं भजते । व्याकरणमिदं चतुःसहस्रसूत्रात्मकं प्रत्याहारशैलोकं संक्षिप्तं विद्यते । अस्य व्याकरणस्य सूत्राणि संज्ञापरिभाषा, विधिः, नियमः, अतिदेशोऽधिकार इति भेदेन षड् विधानि सन्ति ।


© Copyright @ Authors

साम्प्रतं पाणिनीयव्याकरणस्य सकल-संस्कृतव्याकरण-शिरोमणित्वं प्रसिद्धयति । तत्र किं बीजमिति जिज्ञासायां यद्यपि हस्तामलकवत् पाणिनीय व्याकरणस्य वैशिष्टयं सामान्यविज्जनैरपि समाधातुं शक्यते, तथापि विद्विद्भिः परिशीलितं सम्यक् निबद्धं च चमत्करोति लोकानां चेतांसि । पाणिनीयव्याकरणस्यैव वेदाङ्गत्त्वमिति विषये विद्वद्भिः प्रदर्शिता युक्तयः काश्चित् प्रदर्श्यन्ते ।

1. पाणिनीयव्याकरणस्य मूलभूतानि "अइउण्" इत्यादीनि चतुर्दश-सूत्राणि अर्थान्तरेण ब्रह्मोपदेशतया साक्षात् श्रुतिरूपाणि ऋषिभिः स्वीक्रियन्ते । अतएव अक्षरसमाम्नायशब्देन एषां व्यवहारो विधीयते, नेदमैन्द्रादि-व्याकरणेषु वैशिष्ट्यम्। अस्तीति प्रथमं बीजम् अत्र नन्दिकेश्वरकृत-काशिकायां प्रमाणं तथाहि-

**नृत्तावसाने नटराज राजो**
**ननाद ढक्कां नवपञ्चवारम् ।**
**उद्धर्तुकाम सनकादिसिद्धान्**
**एतद् विमर्शे शिवसूत्रजालम् ॥**[2]

2. एतानि चतुर्दश सूत्राणि महर्षिः पाणिनिः तीव्रतरेण तपसा । महेश्वरमाराध्य प्राप्तवानिति द्वितीयं वैशिष्ट्यं, यथोक्तं शिक्षायाम्-

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।**
**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥**[3]

3. तपसा प्रतिभाया विशेषो लभ्यते, yeन तादृशविद्वद् विहिते वाङ्गयेऽद्वितीयं वैशिष्ट्यं समागच्छति । ग्रन्थो हि महावाक्यविशेषसमूहात्मको भवति महावाक्यानि शब्दस्वरूपाणि आप्तोपदेशरूपेणैव प्रामाण्यं प्राप्नुवन्ति। आप्तोनामनुभवेन वस्तुतत्त्वस्य सम्पूर्णतया ज्ञानवान् रागादविशादपि नान्यथावादी भवति । पाणिनिश्च महर्षिः ईदृशं आप्तत्वं भजते, येन तत्प्रणीतस्य व्याकरणस्य किमपि वैशिष्ट्यं भिन्नं भवति ।

4. चातुर्थ्यं हि वैशिष्ट्यमाचारशुद्ध्या सम्पद्यते । तथा च महाभाष्यकारः कथयति- "प्रमाणभूत आचार्यः दर्भपवित्रपाणिः शुचावकाशे प्राङ्गुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म इति" "आचारहीनं न पुनन्ति वेदाः" इत्यादि-वाक्यैः आचार्यस्य महत्त्वं प्रसिद्धमेव ।

5. महता प्रयत्नेन ईदृश आचार्यः शास्त्रमिदं विरचयामासेति पञ्चम वैशिष्ट्यम् । पाणिनिस्तावत् युञ्ज्ञानयोगी आसीत् । तेन प्रयत्न-विशेषपूर्वकमेव तत्त्वं द्रष्टुं संप्रभवेत् ।

6. अपि च पाणिनीय व्याकरणेन लौकिकवद् वैदिकशब्दानामपि लाघवेन साधुत्वबोधः तन्न तथान्येनेति षष्ठमस्यासाधारणं वैशिष्ट्यम् । यथोक्तं भाष्यकारेण- "केषां शब्दानां लौकिकानां वैदिकानाञ्चेति ।"[4]

7. एवं स्वरज्ञानमनेनैव व्याकरणेन संभवति, यतः प्रकृति-प्रत्ययादिषु स्वरानुशासनमपि अनेन कृतम् । स्वरज्ञानं विना च मन्त्रादिर्न सफलो भवति, प्रत्युत हानिमेव विदधाति । शिक्षादौ प्रतिपादितम्-


© Copyright @ Authors

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**[5]

8. किञ्च वेदाङ्गत्वं सर्वथा सुदृढमुपकरोति मुख्यमिव मुख्यमिदं व्याकरणाङ्गममिति । व्याकरणन्तरपेक्षया प्राशस्त्यात् अस्यैव वेदाङ्गत्वमिति । यथोक्तं शेखरेण "श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वमिति ।" ययोर्वृत्तिस्तन्मात्रवृत्तिरेकार्थीभाव इति निष्कर्षैकार्थीभाकलक्षणम् प्रतीतानां विभिन्नपदार्थानामेककालावच्छेदेन एकधर्मावच्छिन्नान्वयित्वम्, "धबखदिरौ छिन्धि ।"

9. पाणिनीयव्याकरणे शाकल्यादीनां पूर्ववर्तिनां वैयाकरणानां सिद्धान्तालोचन-पूर्वकं पाणिनिना व्याकरणसिद्धान्ताः प्रतिपादिता इति नवममस्य वैशिष्ट्यम् ।

10. किञ्च पाणिनिना पूर्ववर्ति-साहित्यगत-शब्दां साधुत्वबोधनाय व्युत्पत्तिलाभाय च धातुपाठोऽपि विहितः इति दशमं वैशिष्ट्यम् ।

11. पुण्यजनकं शब्दानामुपदेशात् स्मृतिरूपत्वमस्य एकादशं वैशिष्ट्यम् । यथोक्तं भर्तृहरिणा-

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।**
**अविच्छेदेन शिक्षानामिदं स्मृतिनिबन्धनम् ॥**[6]

12. व्याकरणस्यास्य पाणिनि-कात्यायन-पतञ्जलिभिरुत्तरोत्तरं लक्ष्यानुसारेण परिमार्जितत्वमिति द्वादशं वैशिष्ट्यम् । एतदभिन्न-व्याकरणेषु नैषा स्थितिविद्यते । अतएवास्यै वेदाङ्गत्वमिति ।

13. किञ्च "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इत्येषा परिभाषा पाणिनीयव्याकरणस्य सर्वाधिकलाघवमूलकत्वं संसूचयन्ति। तथा च लघु तममार्गेण साधुत्वमस्य त्रयोदशं वैशिष्ट्यम् ।

14. अपि च एकदेशविकृतन्याय, तक्रकौण्डिन्यायादि लौकिकन्याय-दृष्टान्त-साहाय्येन सरलतमेन मार्गेण व्याकरणमिदं शब्दानां साधुत्वं बोधयतीति ।

15. छन्दोवत् सूत्राणि भवन्तीति पतञ्जलिस्तावत्, पाणिनीयसूत्रप्रसंगे श्रद्धा विशेषं प्रकटयति । अतएव 'इको यणचि' इति सूत्रव्याख्यानप्रसंगे तेनोक्तम्- "सामर्थ्ययोगान्निह किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यादिति" । तथा च लाघवमूलकनिर्माण-कौशलेन सह वेदसादृश्यम्, ब्रह्मप्राप्तिपूर्वकं परम-पुरुषार्थानां संसाधकत्वमस्य पञ्चदशं वैशिष्ट्यम् । यथोक्तम्-वाक्यपदीय कारेण-

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥**[7]

माहेश्वरसम्प्रदायस्य सम्पोषकेन महर्षिपाणिनिना स्वकीयाष्टाध्याय्यां दश प्राचीनव्याकरणाचार्याणां नामानि समुल्लिखितानि परन्तु विविधग्रन्थेषु अष्टौ व्याकरणप्रवक्तारः समुपलभ्यन्ते । तद्यथा-हैमवृहद्-वृत्त्यवचूर्णि इति ग्रन्थे-


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

**ब्रह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम् ।**
**त्वष्टारमापिशलं चेति पाणिनीयमथाष्टमम् ॥**[8]

एतदतिरिक्तमष्टौ व्याकरणप्रवक्तृणां नामानि स्मर्यते वोपदेवेन कविकल्पद्रुमे-

**इन्द्रश्चान्द्रः काशकृत्स्नापिशाली शाकटायनः**
**पाणिन्यामरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥**[9]

कुत्रचित् नव व्याकरणस्यापि उल्लेखं प्राप्यते। यथा रामायणस्योत्तरकाण्डे-

**सोऽयं नवव्याकरणार्थवेत्ता ॥**[10]

गीतासारनामकं ग्रन्थेऽपि नव व्याकरणस्य चर्चा कृता विद्यते श्री तत्त्वनिधि नामकं वैष्णवग्रन्थे नव व्याकरणस्योल्लेखं एवं विद्यते-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ॥**[11]

एवं प्रकारेण ज्ञायते यत् अनेकानि व्याकरणानि अपि च अनेके व्याकरणप्रवक्तारः सन्ति । तेषु कानिचित् केवलं लौकिकशब्दामनुशासनं कुर्वन्ति एवञ्च कानिचित् केवलं वैदिकशब्दानामनुशासनं कुर्वन्ति, परन्तु पाणिनिव्याकरणमेव तादृशं विशिष्टं वैज्ञानिकं वर्तते । यत् लौकिकानां वैदिकानाञ्चोभयमपि शब्दानामनुशासनं करोति । शब्दानुशासनप्रसङ्गे उक्तमाचार्य पतञ्जलिना भाष्ये-

**शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।**

**केषां शब्दानां? लौकिकानां वैदिकानानां च ॥**[12]

एतदर्थमेव जगति व्याकरणेषु पाणिनीयव्याकरणस्यैव वेदाङ्गत्वं भजते ।

पाणिनीयव्याकरणं न केवलं शब्दानुशासनं करोति अपितु स्वर्गापवर्गस्यापि कपाटपदं समुद्घाटयति। उक्तमाचार्य भर्तृहरिणा-

**तद् द्वारमपवर्गस्य वाङ्गलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामाधिविद्यं प्रकाशते ॥**[13]

अपि च-

**इदमाद्यपदस्थानं सिद्धसोपानपर्वणाम् ।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥**[14]

पाणिनि व्याकरणस्याध्ययनेन तदनुकरणेन धर्मनियमो भवति इति समुल्लिखं भाष्ये- "लोकतोऽर्थप्रयुक्ते शब्दप्रयोग शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति । धर्माय नियमो धर्मनियमः धर्मार्थो वा नियमो धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः ।"[15]

प्रसङ्गेऽतस्मिन् हरिणाऽपि स्वकीय सम्पतमतं निगदितं वाक्यपदीये–


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ॥[16]**

इत्थं प्रकारेण व्याकरणेषु पाणिनीयव्याकरणस्य वेदाङ्गत्वं सर्वैरेव मुक्तकण्ठेन स्वीक्रियते ।

## निष्कर्ष

समग्रविवेचनस्य आधारेण निष्कर्षतया वक्तुं शक्यते यत् भारतीयव्याकरणपरम्परायां यद्यपि अनेकानि व्याकरणशास्त्राणि उपलब्धानि सन्ति, तथापि वेदाङ्गत्वस्य दृष्ट्या पाणिनीयव्याकरणस्य स्थानम् अद्वितीयम् अस्ति। महर्षिपाणिनिना रचिता अष्टाध्यायी भाषावैज्ञानिकदृष्ट्या, दर्शनतत्त्वदृष्ट्या तथा वैदिकदृष्ट्या च सर्वाधिकं परिपूर्णं व्याकरणशास्त्रम् अस्ति।

वेदानां शुद्धपाठस्य, मन्त्रार्थस्य सम्यगवगमनस्य तथा वैदिकभाषायाः संरक्षणस्य यत् कार्यं व्याकरणशास्त्रेण सम्पाद्यते, तत् पाणिनीयव्याकरणेन अत्यन्तं प्रभावकरूपेण सम्पन्नं भवति। अनेन कारणेन परम्परायां व्याकरणवेदाङ्गस्य प्रतिनिधिरूपेण पाणिनीयव्याकरणमेव मान्यतां प्राप्तम्। महाभाष्यकारपतञ्जलिः अपि पाणिनीयसूत्राणां प्रामाण्यं प्रतिपाद्य व्याकरणस्य वेदरक्षणकारित्वं प्रकाशयति।

अन्यानि व्याकरणानि शिक्षोपयोगित्वात् महत्त्वपूर्णानि सन्ति, किन्तु वेदाङ्गत्वस्य अपेक्षितं वैशिष्ट्यं— वेदभाषायाः व्यापकविवेचनं, वैदिकप्रयोगानां संरक्षणं तथा भाषानियमस्य सार्वभौमिकता— पाणिनीयव्याकरणे एव सम्यक् दृश्यते। अतः "व्याकरणेषु पाणिनीयव्याकरणस्यैव वेदाङ्गत्वम्" इति सिद्धान्तः शास्त्रपरम्पराया, भाष्यकारैः तथा विद्वद्भिः सर्वथा समर्थितः अस्ति।

अतः उच्यते यत् पाणिनीयव्याकरणं न केवलं संस्कृतभाषायाः मेरुदण्डः, अपितु वैदिकपरम्परायाः रक्षकः, वेदार्थबोधस्य प्रकाशकः तथा वेदाङ्गशास्त्रेषु सर्वोपरिस्थितं प्रामाणिकशास्त्रम् इति। अतः तस्य अध्ययनं भारतीयज्ञानपरम्परायाः सम्यगवबोधनाय अनिवार्यं मन्यते।

## संदर्भ सूची-

1. वाक्यपदीयं - ब्र०का०- 1.13
2. लघुसिद्धान्तकौमुदी भूमिका इन्दुमती टीका
3. पाणिनीय शिक्षा- 57
4. महाभाष्य पस्पशाह्निक्
5. पाणिनीय शिक्षा- 52
6. वाक्यपदीय ब्रह्मकाण्डम् - 1.132
7. वाक्यपदीय ब्रह्मकाण्डम्- 1.16
8. हैमबृहद् वृत्त्यवचूर्णि
9. कविकल्पद्रुम


© Copyright @ Authors

10. रामायण उत्तरकाण्ड- 36/47
11. तत्त्वनिधि वैष्णवग्रन्थ
12. महाभाष्य पस्पशाह्निकम्
13. वाक्यपदीय ब्र०का०- 1.14
14. वाक्यपदीय ब्र०का०- 1.16
15. महाभाष्य पस्पशाह्निके जयशंकर लालत्रिपाठी - पृ०- 92
16. वाक्यपदीय ब्र०का०- 1.30


© Copyright @ Authors